National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 156-158
© 2026 NJHSR
www.sanskritarticle.com

**अष्टमी बेज्**
शोधार्थी, साहित्यविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**अष्टमी बेज्**
शोधार्थी, साहित्यविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# भासनाटकचक्रे नारीपात्राणां योगदानम्

**अष्टमी बेज्**

**DOI:** https://doi.org/10.5281/zenodo.20792232

**सारांशः-**

संस्कृतकाव्यजगति महाकविभासः सर्वादिमः रुपककर्ता वर्तते। भासरुपकेषु नारीपात्राणां योगदानम् इति विषये वयं पश्यामः आदौ संस्कृतवाङ्मयम्, अनन्तरम् संस्कृतसाहित्यम्, भासपरिचिति, भासस्यकृतयः, भासनाटकचक्रे स्त्रीपात्राणां परिशीलनम्, स्त्रीपात्रचित्रणे भासस्य नैपुण्यम् इत्यादयः।

**संस्कृतवाङ्मयम् -**

मानवसंस्कृतेरध्यात्मिकदर्शनस्य च समुन्नयनदृष्ट्या प्राच्यप्रतीच्योभयविधविद्वद्भिः अद्यापि सूक्ष्मं सूक्ष्मतरं च समीक्षणं विधीयते। तत् समीक्षणविध्यनुसारेण वेदो हि सृष्टेरमरकाव्यमिति नास्ति संशीतिः। वेदानां सौन्दर्यपक्षोऽपि तावानेव प्रबलो विद्यते यावान् सत्यशिवमयः पक्षः। यथा हि भारतीयसंस्कृतेः ज्ञानविज्ञानादीनां परम्पराणां च बीजः वेदेषूपलभ्यते तथैव तेषु काव्यपरम्पराया बीजमपि सोत्कण्ठमन्वेष्टुं शक्यते।

वैदिकवाङ्मये यद्यपि प्रभुसम्मितवाक्यानामेव प्राधान्यं वरीवर्ति तथापि तत्र कान्तासम्मितोपे-देशानामपि न्यूनता नास्ति। उपनिषदां रचनाशैल्याऽपि प्रतीयते यत् ऋषित्व – कवित्वयोः कवितादर्शनयोश्च परस्परं विरोधो नास्ति इति। केवलं वेद एव नापितु सकलं ब्रह्माण्डमेव परमेश्वरस्य भव्यं काव्यम्। भरतमुनिना तु सजलजलदगिरा प्रतिपादितं यत् सर्वेषामपि नाट्याङ्गानामुत्पत्तिवेदेभ्य एव सञ्जात इति। उक्तं च नाट्यशास्त्रकारेण -

**"जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसानाथर्वणादपि ।।**
**वेदोपवेदैः सम्बद्धो नाट्यवेदो महात्मना ।**
**एवं भगवता सृष्टो ब्रह्मणा सर्ववेदिना।।"[1]**

**संस्कृतसाहित्यम्-**

अतिमहत्त्वपूर्णम्, अतिव्यापकं, प्राचीनतायां सर्वातिशायि भवति संस्कृतसाहित्यम्। साहित्यं सकलसुखसाम्राज्यसाधनं, निरवधिदुः खराहित्यनिदानम्, अलोकिकान्दकारणम् च भवति।

"समष्टिः सर्वशास्त्राणां साहित्यमिति कथ्यते।" अर्थात् संस्कृतस्य सर्वेषु अपि शास्त्रेषु ये ये सारभूताः विषयाः सन्ति तेषां सारभूतविषयाणां संग्रहरूपमेव साहित्यं भवति। विश्ववाङ्मये संस्कृतसाहित्यं स्वीयया गम्भीरतया व्यापकतया विपुलतया च विशिष्टं पदं धारयति। परं सहस्रवत्सराणां सर्जनापरम्परा शास्त्रीयेण विवेचनेन सूक्ष्मातिसूक्ष्मेण चिन्तनेन च समर्पितमिदं साहित्यं नानारुपैः विभूषितं विद्यते। साहित्यं हृदयस्य तथा मस्तिष्कस्य भावनानां विचाराणां व्यक्तिरूपमस्ति। साहित्ये समाजस्य प्राणः अन्तर्निहिताः सन्ति। तथा समाजस्य अतीतवर्तमानयोः एवं भविष्यदादर्शस्य यथार्थस्य परिच्छदं विराजमानमस्ति। लेखकः स्वहृदयतया विचित्रानुभवशक्त्या दूरदर्शिकतया च अपिगोप्यमानान् रहसि आननेन स्वसाहित्ये उद्घाटयति।

**महाकविभासः-**

भारतीयनाट्यवाङ्मये सर्वादिमः रुपककर्ता महाकविः भासः वर्तते। सः क्री.पू.३००-२०० वर्षाणां मध्यकाले आसीदिति इतिहासाकाराणाम् अभिप्रायः। कविताकामिन्याः हासेन कवि-कला-कौसलस्य

लास्येन विहित-संस्कृतविकासेन विश्वविख्यात–वैदुष्य-प्रकाशेन महाकविभासेन परिचयहीनाः। महाकविकालिदासेनापि मालविकाग्निमित्रनाटकस्य प्रस्तावनायां भासस्योल्लेखः कृतः प्रथितयशसां भास – 'सौम्मिल- कविपुत्रादीनां प्रबन्धानतिक्रम्य कथं वर्त्तमानस्य कवेः कालिदासस्य कृतौ बहुमनः'। वाणभट्टेन हर्षचरितस्यादौ भासस्य प्रशंसा कृता –

**" सूत्रधारकृतारम्भैर्नाटकैबर्हुभूमिकैः।**

**सपताकैर्यशो लेभे भासो देवकुलैरिव ।।"**[2]

**भासनाटकचक्रम्-**

भास नाटकचक्रे त्रयोदश रुपकानि सन्ति। तानि रुपकानि चतुर्विधानि सन्ति। यथा-वत्सराजकथामूलकं रुपकद्वयम् – १.प्रतिज्ञायोगन्धरायणम् २.स्वप्नवासवदत्तम्। रामायणमूलकं रुपकद्वयम् ३.प्रतिमानाटकम् ४. अभिषेकनाटकम्। महाभारतमूलकानि सप्तरूपकाणि ५.ऊरुभङ्गम् ६.दूतवाक्यम् ७. पञ्चरात्रम् ८.दूतघतोत्कचम् ९. कर्णभारम् १०. मध्यमव्यायोगः ११. बालचरितम्। लौकिक रुपकद्वयम् १२.अविमारकम् १३. चारुदत्तम्। संस्कृतरूपककर्तृषु त्रयोदशरूपकाणि विरचय्य अत्युन्नतस्थानं अलंकृत्य विराजते साहित्यजगति।

**नारीशब्दस्य पर्यायवाचीशब्दाः**

मेना, स्त्री, ज्योषा, ज्योषित्, ज्योषिका,नारी, वामा, अबला, सुन्दरी, प्रमदा, तरुणी, युवती, मोहिनी, ललना, मानिनी, महिला, पुत्री, सुता, बाला, दारिका, दुहिता, मध्यमिका, रमणा, रमणी, पत्नी, गृहिणी, प्रियतमा, प्रेयसी, वधू, वधूका, वधू, वधूरी, माता, जननी, जनयत्री, जनित्री, जनिः, जनिका, जनी, गणिका, मुक्ता, लज्जा, विलासिनी, च।

**प्रतिमानाटकस्य स्त्रीपात्रपरिशीलनम् –**

रामायणाश्रिते सप्ताङ्कविशिष्टेऽस्मिन् प्रतिमानाटके महाकविभासेन जनकतनया तथा रामभार्या सीतायाः, राममाता कौशल्यायाः, भरतमाता कैकेय्याः, लक्ष्मणशत्रुघ्नयोः माता सुमित्रायाः, सीतायाः सखी अवदातिकायाः, कैकेय्याः परिचारिकाः तापसी – विजया – नन्दिनिकायाः च पात्रचित्राङ्कयति ।

भासकृतप्रतिमानाटकस्य नायिका सीता वर्तते। सीता भूमिसुता जनकनन्दिनी च। महाकविः भासः स्वस्य हृदयोद्गारस्य समस्तं कोमलता – गम्भीरता – सरसतादि माधुर्यगुणान् सीतायाः पात्रचित्रणे निक्षिप्तवानस्ति । सीता एतादृशी गौरवशालिनी धीरा च आसीत् यत् तया रामस्य राज्याभिषेकसमये अथवा वनगमनसमये वा तस्याः चित्ते उद्विग्नता नाऽसीत्। सा केवलं सङ्केतं करोति यत् **–'प्रियं मे महाराज एव महाराजः आर्यपुत्र एवार्यपुत्रः।'** रामजननी कौसल्याः हृदयवात्सल्यमयी परिपूर्णासीत्। कौसल्या त्यागस्य, तपस्याया, अनुरागस्य च साक्षात् प्रतिमुर्तिः आसीत्।

**अभिषेकनाटकस्य स्त्रीपात्राणि –**

रामायणाश्रिते षष्ठाङ्के विशिष्ट्येऽस्मिन् रूपके महाकविभासेन अभिषेकनाटकस्य नारीचरित्रचित्रणे जनकनन्दिनी तथा च राजपत्नी सीतायाः, बालीपत्नी तारायाः, विजयायाः चरित्राणां चित्राङ्कनं कृतवान्। अभिषेकनाटके भासेन सीता पतिव्रतापरायणा धर्मपरायणा नारीरूपेण निरूपणं कृतम्। सीतायाः शापात् त्रिभुवनविजेता रावणः भीतिं प्राप्तवान् –

**"देवाः सेन्द्रोदया भग्ना दानवाश्च रणे ।**

**सोऽहं मोहं गतोऽस्म्यद्य सीतायास्त्रिभिरक्षरैः।।"**[3]

तारा बालिनः पत्नी वानरराज्ञी चासीत् एषा भर्तुनुरागिनी, भर्तृहितैषिणी च। एषा स्वभर्तारं सुग्रीवेण सह युद्धं मा कुरु इति प्रार्थनां करोति – **"प्रसीदतु प्रसीदतु महाराजः। अल्पेन कारणेन नागमिष्यतिसुग्रीवः । तदमात्यवर्गेण सह सम्मन्त्य गन्तव्यम् ।"**[4]

**बालचरितनाटकस्य स्त्रीपात्राणि –**

भासकविविरचितत्रयोदशरूपकेषु श्रीमद्भगपुराण अथवा महाभारतस्य खिलपर्व हरिवंशावलम्ब्य विरचिते पञ्चाङ्कविशिष्टे वालचरितनाटके वसुदेवपत्नी तथा श्रीकृष्णस्य माता देवक्याः, प्रतीहार्याः, धात्र्याः, कात्यायन्याः, राजश्रियः चरित्राणिचित्रितानि। अत्र भासेन देवकीपात्रेण स्त्रीसहजस्वभावाः निरूपिता। स्वीयसन्तानविषये अस्याः व्यवहारः वात्सल्यमय आसीत्। यदा यदा कंसः आगत्य शिशुन् मारयितुं नयति तदा तदा एषा उच्चैः आक्रन्दनं करोति। राजश्री कंसस्य राजस्य राजलक्ष्मी आसीत्। अस्याः कार्यं राज्यसंरक्षणमेव। अस्मिन् नाटके तिस्रः प्रतिहार्य्यः वर्तन्ते।

**महाभारताश्रितरूपकाणां स्त्रीपात्रपरिशिलीनम्**

**मध्यमव्यायोगे स्त्रीपात्राणि**

महाभारते वहूनि स्त्रीपात्राणि वर्तन्ते, परन्तु महाकविभासेन रचिते रूपकेत्रये यथा– मध्यमव्यायोगे– हिडीम्बा,ब्राह्मणी, दूतघटोत्कचे– गान्धारी, दुःशला, प्रतिहारी, उरुभङ्गे – गान्धारी, पौरवी, मालवी इति एतेषां स्त्रीपात्राणां चरित्रचित्रणमत्र रूपकाधारेण प्रस्तूयन्ते ।

मध्यमव्यायोगनाटके घटोत्कचस्य मुख्यभूमिका वर्तते। मध्यमव्ययोगनाटकस्य नायिका मध्यमपाण्डवस्य भीमसेनस्य पत्नी घटोत्कचस्य माता हिडिम्बा। सा अत्यन्तं बुद्धिमती चासीत् । वस्तुतः सा तु "जात्या राक्षसी न समुदाचारेण " अर्थात् सा जात्या राक्षसी परन्तु आचारव्यवहारेण मानवी आसीत्। अस्मिन्नाटके केशवदासनाम्नाः एकः वृद्धब्राह्मणस्य भार्या आसीत् ब्राह्मणी।

**दूतघटोत्कचनाटकस्य स्त्रीपात्राणि –**

अस्मिन्नाटके स्त्रीणां भूमिका अत्यन्तं महत्वपूर्णमेव । कौरवजननी गान्धारी, दुर्योधनस्य भगिनी दुःशला, द्वारपालिका प्रतिहारी इति त्रीणि पात्राणि नाटकेऽस्मिन् वर्तन्ते । गान्धार्याः महत्वपूर्णं स्थानं भवति। तस्या न्यायपरायणता, स्नेहपरायणता,वात्सल्यं भारतीय नारीसमाजस्य आदर्शाः भवन्ति ।

**ऊरुभङ्गनाटकस्य स्त्रीपात्राणि**

ऊरुभङ्गनाटकस्य स्त्रीपात्रेषु दुर्योधनस्य माता गान्धारी दुर्योधनस्य पन्त्यौ पौरवी मालवी च भवतः। ऊरुभङ्गनाटके गान्धारीपात्रं मन्दभागिनी मातुः रूपेण चित्रितम्।

**बृहत्कथाश्रित्यरूपकाणां स्त्रीपात्रपरिशीलनम् –**

**अविमारकनाटकस्य स्त्रीपात्राणि –**

प्राचीनलोककथा तथा बृहत्कथावलम्बने रचिते षष्ठाङ्कविशिष्ट्येऽस्मिन् रूपके कविभासेन कुन्तिभोजस्य महिषी कुरङ्ग्याः माता च देव्याः, कुन्तिभोजस्य कन्या अविमारकस्य पत्नी च कुरङ्ग्याः, अविमारकस्य माता काशिराजपत्नी सुदर्शनायाः, कुन्तिभोजस्य द्वारपालिका प्रतिहार्य्याः, कुरङ्ग्या सेविका चेट्याः, मागधिकायाः विलासिन्याः, वसुमित्र्याः हरिणिकायाः, विद्याधरस्य पत्नी सौदामिन्या च चरित्राणि उपस्थापितानि। कुन्तिभोजललना नायिका अजातोपयमा कन्या परकीया मुग्धा च भवति । देवी कुन्तिभोजस्य राज्ञः पत्नी कुरङ्गयाः माता। सा सर्वदा प्रसन्ना भवति।

**चारुदत्तनाटकस्य स्त्रीपात्राणि –**

प्राचीनलोककथा तथा बृहत्कथावलम्ब्ये रचितमिदं नाटके अङ्कचतुष्टयात्मके महाकविभासेन यानि स्त्रीपात्राणि उपस्थापितानि तानि सर्वाणि अत्र प्रदर्शयिष्यन्ते। तत्र चारुदत्तनाटकस्य नायिका वसन्तसेनायाः, चारुदत्तस्य भार्या ब्राह्मण्याः, चारुदत्तस्य दासी रदनिकया, वसन्तसेनायाः दासी मदनिकायोः चरित्राणि उल्लिख्यन्ते।

**प्रतिज्ञायौगन्धरायणनाटकस्य स्त्रीपात्राणि –**

प्राचीनलोककथा तथा बृहत्कथावलम्ब्य रचिते अङ्कचतुष्टयात्मकरूपके कविभासेन महासेनस्य राणी अङ्गारवती एवञ्चवत्सराजस्य प्रतिहारि विजयाः चरित्रचित्रणं कृतम्। अङ्गारवत्याःचरित्रं प्रतिज्ञायौगन्धरायणे स्वप्नवासवदत्ते च वर्तते।एषा अवन्तिराज्ञः प्रद्योतस्य पत्नी एवं वासवदत्तायाःजननी च।

**स्वप्नवासवदत्तनाटकस्य स्त्रीपात्राणि –**

चरित्रचित्रणे सिद्धहस्तो भासः स्त्रीपात्रचित्रणे स्वीय नैपुण्यतां कथं प्रदर्शितवान् इति अनुशीलनं क्रियते। तत्र वासवदत्ता नाटकस्य नायिका नायकोदयनस्य प्रथमा पत्नी च, पद्मावती मगधराजदर्शकस्य भगिनी तथा उदयनस्य द्वितीया पत्नी, तापसी मगधराजस्य तपोवनस्य तपस्विनी, वासवदत्तायाः माता अङ्गारवती, मधुकरिका, पद्मिनिका, धात्री, वसुन्धरा, विजया इत्यादिनां चरित्राणां वर्णनमत्र प्रस्तूयते ।

**स्त्रीपात्रचित्रणे भासस्य नैपुण्यम् –**

कविकुलशेखरेण भासेन शृङ्गाररसभृङ्गारमयीषु स्वकीयरचनासु यथा पुरुषपात्राणां चरित्र चित्रणावसरे तथैव स्त्रीपात्राणां चित्रणेऽपि सविशेषमभिनिवेशः प्रदर्शितः। भारतीयसंस्कृतेः समाजस्य च वास्तविकं स्वरूपं भासस्य रचनासु सर्वत्र लोचनपथमवतरति। रामायणाश्रितरूपकयद्वये अधिकमाहात्म्यादिप्रदर्शनचेष्टा विहिता। गुरुषु भक्तियुक्ता साध्वी सीता सानन्दमात्मप्रभुं रामं छायेवानुसृत्य सर्वथादर्शभूता सञ्जाता। भागवताश्रितरूपकं बालचरितनाटके देवी देवक्याः चरित्रे पतिप्रेम एवं च पुत्रवात्सल्यादि गुणाः प्रकट्यते कविना भासेन। दूतघटोत्कच - ऊरुभङ्गनाटकयोः गान्धारी आदर्शमातायाः मूर्तिरूपेण प्रदर्शिता। अविमारकरूपकेऽस्मिन् राजपुत्री कुरुङ्गी सर्वगुणासम्पन्ना अत्यन्तनिर्मलप्रणयिनी इति चित्रिता। स्वप्नवासवदत्तरूपके वासवदत्तापद्मावत्योः परस्परसौहार्दपूर्णमाचरणमपि लक्षणीयम् ।

संस्कृतसाहित्ये नारीणां मातृरूपेणापि चारुचित्रणं नयनमार्गमधिरोहति । नारीचरित्रेष्व श्रेष्ठा अन्यतमा भवति माता । संसारेऽस्मिन् मातुः कर्तव्यम् अधिकं वतर्ते । माता सर्वत्र सर्वदा छायारूपेण भवति । साधूच्यते यथा –

**“नास्ति मातृसमछाया नास्ति मातृसमा गतिः ।**
**नास्ति मातृसमं त्रणं नास्ति मातृसमा प्रिया ।।”**[5]

**सहायकग्रन्थसूची –**

१.मालवीयः, डा.सुधाकरः, (१९७९), भासनाटकचक्रम् (महाकविभासः), वाराणसी, चौखम्बा-कृष्णदास- अकादमी।

२.रायः डा. गङ्गासागरः, अभिषेकनाटकम् (महाकविभासः), वाराणसी, चौखम्बा- संस्कृत -संस्थान।

३.मिश्रः आचार्यः रामचन्द्रः, (१९९९), प्रतिमानाटकम् (महाकविभासः), वाराणसी, चौखम्बा -संस्कृत- सीरीज- आफीस।

४.रायःगङ्गासागरः,(१९९८) भासनाटकचक्रम् (महाकविभासः), वाराणसी , चौखम्बा- संस्कृत -संस्थान।

**पाद टिप्पणी -**

[1] नाट्यशास्त्रम्- 1/17,18

[2] हर्षचरितम्- 1/16

[3] अभि. ना.- 2/18

[4] अभि. ना.- प्र.अ.

[5] स्क. पु.-ना.ख- 51-17